अथ शान्तिप्रकाशान्तर्गता

मूलशान्ति



खेमराज श्रीकृष्णदास प्रकाशन बम्बई

संस्करण :अप्रेल २०१३, सम्वत् २०७०

मूल्य : १५ रुपये मात्र

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

मुद्रक एवं प्रकाशक
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्री वेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग
मुंबई - ४०० ००४

Printers & Publishers
Khemraj Shrikrishnadass
Prop : Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg.
7 th Khetwadi, Mumbai. 400 004

Web Site : http://www.khe_shri.com
E-Mail khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadas
Prop.: Shri Venkateshwar Press, Mumbai 400004
at their Shri Venkateshwar Press,
66 Hadapsar Industrial Estate, Pune 411013

श्रीः ।

अथ शान्तिप्रकाशान्तर्गत–

मूलशान्तिप्रयोगः ।

शौनकः– अभुक्तमूलोत्पत्तौ वर्षाष्टकं शिशुत्यागः ततः शान्तिः । तदन्यमूलोत्पत्तौ द्वादशाहे आगामिमूलयुते शुभे दिने वा अन्यत्र शुभदिने वा गोमुखप्रसवशान्तिं कृत्वा शान्तिः कार्या । तत्रादौ शुभे पवित्रदेशे मण्डपकुण्डवेदिकाः यथाविधि विधाय यजमानः सुस्नातः आचान्तःकृतनित्यक्रियो यागमण्डपं प्रविश्य ब्राह्मणानाहूय तद्द्वारा

आनोभद्रा इत्यादिस्वस्त्ययनमारभेत् । ततो लक्ष्मीनारायणादिदेवान्प्रणम्यॐ सुमुखश्चैकदन्तश्चेत्यादिगणपति स्मरणं च कृत्वा प्रतिज्ञासंकल्पं कुर्यात् । देशकालौ संकीर्त्य ममास्य कुमारस्य कुमार्या वा मूलप्रथमचरणादिजन्मसूचितपित्राद्यरिष्टनिरासार्थं आयुरारोग्यधनधान्यादिसमृद्धिकामनया श्रीपरमेश्वरप्रीत्यर्थं सनवग्रहमखां मूलजननशान्तिं करिष्ये इतिसंकल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धानि कृत्वा आचार्यब्रह्मसदस्यान्ॠत्विजश्चाष्टौ चतुरो वा वृत्वा मधुपर्कवस्त्रालंकारादिभिर्यथाविभवमर्चयेत् ।

ततः आचार्यः प्राणानायम्य अस्मिन् कर्मणि आचार्यकर्म करिष्ये इति संकल्प्य यदत्र संस्थितमिति सर्षपान्विकीर्य आपोहिष्ठादिमंत्रैः कर्मभूमिं प्रोक्ष्य (मंडपपक्षे मंडपपूजां कृत्वा) ईशानदेशे वर्णकैः स्वस्ति विरच्य तत्र रुद्रकलशं स्थापयेत् । तद्यथा ॐ महीद्यौः पृथिवीचंनऽइमं यज्ञम्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥ इति भूमिं स्पृष्ट्वा ॥ १ ॥ तत्र ओषधयः समितिद्रोणप्रमाणव्रीहीन्निक्षिप्य ॐ ओषधयः संवदन्तेसोमेनसह राज्ञां ॥ यस्मैकृणोति

ब्राह्मणस्त ँ राजन्पारयामसि ॥ २ ॥

तत्र आजिघ्रेतिकलशं स्थापयेत् ॐ आ-
जिघ्रंकलशंम्मह्यात्वाविशन्त्विन्दवः ॥
पुनरूर्ज्जानिवर्तस्वसानः सहस्रन्धुक्ष्वो-
रुधारापयस्वती पुनर्माविशताद्रयिः॥३॥

वरुणस्योत्तंभनमसीतिजलं पूरयेत् ।
ॐवरुणस्योत्तम्भनमसिवरुणस्यस्कम्भस
र्जनीस्थोवरुणस्यऽऋतसदन्यसि वरुण-
स्यऽऋतसदनमसि वरुणस्यऽऋतसदन
मासीद ॥४॥ गन्धद्वारामितिगन्धं॰ ॐ
गन्धद्वारांदुराधर्षांनित्यपुष्टां करीषिणीम्
॥ ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रि-

यम् ॥ ५ ॥ याओषधीरितिसर्वौषधीः ।
ॐ याऽओषधीः पूर्वा जातादेवेभ्यस्त्रियु-
गंपुरा । मनैनुबभ्रूणामहꣳशतन्धामानि
सप्तचं ॥६॥ काण्डात्काण्डादितिदूर्वाः ।
ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुष
स्परि ॥ एवानो दूर्वे प्रतनुसहस्रेणशते-
नं च ॥७॥ अश्वत्थेवेतिपञ्चपल्लवान् । ॐ
अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता ।
गोभाजइत्किलासथयत्सनवथपूरुषम् ॥
॥ ८ ॥ स्योना पृथिवीतिसप्तमृदः । ॐ
स्योनापृथिविनोभवानृक्षरानिवेशनी ॥
यच्छानःशर्म्मसप्रथाः ॥ ९ ॥ याः फलि-

नीरितिफलम् । ॐ याःफलिनीर्याऽफला
ऽअंपुष्पायाश्चं पुष्पिणीः॥ बृहस्पतिप्र-
सूतास्तानो मुञ्चन्त्वंहसः ॥ १० ॥ परि-
वाजपतिरिति पंचरत्नानि । ॐ परिवा-
जंपतिःकविरग्निर्हव्यान्न्यक्रमीत् ॥ दध-
द्रत्नांनिदाशुषे ॥११॥ हिरण्यगर्भेतिहिर-
ण्यम् । हिरण्यगर्भःसमंवर्त्तताग्रेभूतस्यं
जातः पतिरेकं आसीत्॥सदाधारपृथिवीं
द्यामुतेमांकस्मैं देवायंहविषांविधेम १२॥
आपोहिष्ठेतित्रिभिः पंचगव्यंचप्रक्षिप्य ।
ॐ आपोहिष्ठा० ॥ १३ ॥ योवः शिव०
॥१४॥ ॐ तस्माऽअरंङ्ग० ॥१५॥ युवा-

सुवासाः परिवीतऽआगात्सऽउश्रेयान्भ-
वति जायमानः ॥ तंधीरांसः कवयउन्नं
यन्तिस्वाध्यो मनंसादेवयन्तः ॥ १६ ॥
पूर्णादर्वीतितदुपरिताम्रादिमयं तंडुलपूर्ण
पात्रं निदध्यात् । ॐपूर्णादर्विपरांपतसु-
पूंर्णापुनरापंत । वस्नेवविक्रीणावहाऽइष-
मूर्ज्जंशतक्रतो ॥ १७ ॥ ततः तत्वाया-
मीतिवरुणमावाह्य । तत्वांयामिब्रह्मंणा
वन्दंमानस्तदाशांस्तेयजमानोहविर्भिः ॥
अहेडमानोवरुणेहबोध्युरुंशंसमानऽ-
आयुःप्रमोषीः ॥१८॥ वरुणंसाङ्गंसपरि-
वारमावाहयामि। ॐभूर्भुवःस्वःअपांपतये

वरुणायनमः । इतिमंत्रेणषोडशोपचारैः
पूजयेत्॥ततोगंगाद्यावाहनम्॥सर्वेसमुद्राः
सरितस्तीर्थानिजलदानदाः ॥ आयान्तु
मम शांत्यर्थं दुरितक्षयकारकाः॥१॥ततः
कलशाभिमंत्रणम्।कलशस्य मुखे विष्णु-
रित्यादिदेवदानवसंवादेइतिप्रार्थनांचकु
र्यात् ॥ एवं रुद्रकलशं संस्थाप्य तदुपरि
सुवर्णनिर्मितां रुद्रप्रतिमामग्न्युत्तारणपू-
र्वकं सन्निधाय त्र्यंबकमिति मंत्रेणावाह्य
पूजयेत्। त्र्यंबकमितिमंत्रस्य वसिष्ठऋ-
षिरनुष्टुप्छन्दो रुद्रो देवता रुद्रावाहने
विनियोगः । ॐ त्र्यंम्बकं यजामहेसुग-
न्धिम्पुंष्टिवर्धनम् ॥ उर्वारुकमिवबन्धं-

नान्मृत्योर्मुक्षीयमामृतात् । ॐ भूर्भुवः स्वःभगवन् रुद्र इहागच्छ इहतिष्ठ इत्यावाह्य ॐ रुद्राय नम इति षोडशोपचारैः पूजयेत् ॥ तत एकऋत्विक् रुद्रकुंभं स्पृष्ट्वा ॐ नमस्ते रुद्रमन्यव इति रुद्राध्यायं ॐ वाजश्चमे इति चमकाध्यायं च पठेत्। (पाठाकरणे प्रत्यवायो भवति) ततः रुद्रकुंभात्प्रागुदग्वा चतुर्विंशद्दलं पंकजं पंचवर्णैस्तंडुलैः पिष्टेन वा कृत्वा तत्र कर्णिकायां प्राग्वत्कुंभंसंस्थाप्यतच्चतुर्दिक्षु चतुरः कलशान्स्थापयित्वा पूर्णपात्रनिधानान्तंकृत्वासर्वत्रवरुणमावाह्य पूजयेत् (प्रतिकलशस्थापने मंत्रावृत्तिः) पंचकुंभासंभवे चतुःप्रस्रवणपंचवक्त्र

कुंभं स्थापयित्वा सर्वं तत्रैव कुर्यात् ।
ततः पूर्वस्थापितकुंभचतुष्टयेषु क्रमेणप्र-
थमेदेवदारुचंदनरक्तचन्दन कमलनीलो-
त्पलकुष्ठप्रियंगुशुण्ठीमुस्तामलकवचास-
र्षपतगरमुरासांसीवृद्धि ऋद्धि उशीरा-
दीन् क्षिपेत्। द्वितीये पंचामृतगजमदती-
र्थोदकसप्तधान्यसुवर्णानि क्षिपेत्। तृतीये
गजाश्ववराहोत्खातराजद्वाररथशालागो
शालाचतुष्पथमृत्तिकाः क्षिपेत् । चतुर्थे
मुक्ताप्रवालमाणिक्यवज्रेन्द्र नीलेतिपंच-
रत्नानि वटाश्वत्थपलाशप्लक्षोदुंबरपल्लवा-
अंबूकदंबनिंबचिंचिकावटोदुम्बरप्लक्षचू
तमूलत्वचः सर्वकूपजलानि च निःक्षि-
पेत् । मध्यगतशतच्छिद्रे च शतौषध-

यस्तदभावे विष्णुक्रान्तां सहदेवीं तुलसीं
शतावरीं कुशान् कुंकुमं च प्रक्षिप्य
पूर्णपात्रनिधानान्तं कृत्वा तत्र वस्त्रोपरि
अष्टदलंविरच्य तत्कर्णिकायां निष्कत-
दर्द्धतदर्धसुवर्णनिर्मितां वा निर्ऋतिप्रति-
मामग्न्युत्तारणपूर्वकं पंचामृतस्नापितां
मोषुण इति मंत्रेण संस्थाप्य तद्दक्षिणतः
इन्द्रंवोइतीन्द्रं तदुत्तरतश्च अप्सु मे इति
मंत्रेण जलप्रतिमां च स्थापयेत्। तद्यथा
मोषुणइति मंत्रस्य घोरःकाण्वोऋषिर्नि-
र्ऋतिर्देवता गायत्रीछंदः निर्ऋतिस्थाप-
नेविनियोगः। ॐ मोषुणःपरापरानिर्ऋ
तिर्दुहणावधीत्॥पदीष्टतृष्णयासह॥१॥
ॐ भूर्भुवः स्वः भगवन्निर्ऋते इहागच्छ

इह तिष्ठ इत्यावाह्य संस्थाप्य ध्यानं कुर्यात् । संस्मरेन्निर्ऋतिं श्यामं सुमुखं नरवाहनम् । रक्षोधिपं खड्गहस्तं दिव्या-भरणभूषितम् ॥१॥ इन्द्रंवो इति मंत्रस्य मधुच्छंदाऋषिरिन्द्रो देवता गायत्री छन्दःइंद्रस्थापने विनियोगः । ॐइंद्रंवो-विश्वतंस्परिहवामहेजनेभ्यः ॥ अस्मा-कंमस्तुकेवलः ॐभूर्भुवः स्वः इन्द्र इहा-गच्छ इह तिष्ठ इति इन्द्रं संस्थाप्य । तदुत्तरतः अप्सु मेइतिमंत्रस्य मेधाति-थिर्ऋषिरापोदेवता अनुष्टुपछंदः अपां-स्थापने विनियोगः । ॐ अप्सु मेसोमोऽ अब्रवीदन्तर्विश्वानिभेषजाअग्निंच विश्व

शंसुवमापश्च विश्वभेषजीः॥ ॐ भूर्भुवः स्वः आप इहागच्छत इह तिष्ठत इत्यपः स्थापयेत्। ततः प्रागादितश्चतुर्विंशतिषु दलेषु उत्तराषाढाद्यनुराधांतनक्षत्राणामधिदेवताः स्थापयेत्। तद्यथा-ॐ भूर्भुवः स्वः विश्वेदेवा इहागच्छत इह तिष्ठत १ ॐ भूर्भुवः स्वः विष्णो इहागच्छ इह-तिष्ठ २ ॐ भू० वसव इहागच्छत० ३ ॐ भू० वरुण इहागच्छ० ४ ॐ भू० अजैकपादिहागच्छ० ॐ भू० अहिर्बुध्न्य इहा० ६ ॐ भू० पूषन्इहा० ७ ॐ भू० अश्विनौ इहागच्छतं० ८ ॐ भू० यम इहागच्छ० ९ ॐ भू० अग्नेइहा० १०ॐ प्रजापतेइहा० ११ ॐ भू० सोम इहा०

१२ॐ भू०रुद्र इहा० १३ ॐ भू० अदि-
ते इहा० १४ ॐ भू० बृहस्पते इहा० १५
ॐ भू० सर्पा इहागच्छत१६ ॐ भू० पि-
तर इहा० १७ ॐ भू० भग इहागच्छ०
१८ ॐ भू० अर्यमन्निहा० १९ ॐ भू०
सवितरिहागच्छ२० ॐ भू० त्वष्ट इहा०
२१ ॐ भू० वायो इहा० २२ ॐ भू०
इन्द्राग्नी इहा० २३ ॐ भूर्भुवः स्वः मित्र
इहागच्छ इहतिष्ठ २४ इत्येतास्ततोलो-
कपालांश्चतुर्थ्यंतनमोन्तैर्नामभिः क्रमे-
णावाह्य ॐ मनोजूतिर्जुषतामाज्यस्यबृ-
हस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञठंसमिमं
दधातु ॥ ३ ॥ विश्वेदेवासऽइहमादय-
न्तामोम्प्रतिष्ठ ॥ इति प्रतिष्ठाप्य।

ॐ निर्ऋतये नमः इति निर्ऋतिं० । ॐ इन्द्रायनमः इतीन्द्रं० । ॐ अद्भ्यो नम इत्यपश्च क्रमेण षोडशो पचारैः संपूज्य । मण्डलस्थापिताः विश्वेदेवादेवताश्चतुर्थ्यंतनमोन्तैर्नामभि-र्लोकपालेभ्यो नम इति लोकपालांश्च प्रत्येकं तंत्रेण पूजयेत् । तत्र वस्त्रयुग्मम् । रक्तचंदनम् । कृष्णसुरभीणि पुष्पाणि । मेषशृङ्गस्य धूपः । आज्यस्य दीपः । पोलिकौदनादि पुरुषाहारान्नं नैवेद्यम् । ब्राह्मणानांसुरास्थाने सैंधवमिश्रं क्षीरम् । मांसस्थाने लवणयुक्तं पायसम् ॥ एताव-न्नैवेद्यं च समर्पयेत् । प्राक्कुंभे आशुः शिशान इत्यादित्रयोदशर्चम् ॥

॥ १२ ॥ दक्षिणकुंभेत्वमग्नेरुद्रइत्याद्यनु-
वाकं पश्चिमकुंभे त्वमग्न इत्यादिसूक्तम् ।
उत्तरकुंभे रक्षोहरणमिति पंचविंशर्चं च
जपेत् । मध्यकुंभे त्र्यंबकमितिमंत्रमष्टो-
त्तरशतं पवमानसूक्तं च सकृज्जपेत् । तत
आचार्यो रुद्रकुंभान्नैर्ऋत्येस्थंडिले अग्निं
प्रतिष्ठाप्य तदीशान्यां नवग्रहमण्डले
ग्रहस्थापनंकृत्वासंपूजयेत् ॥११॥ ततः
कुशकंडिकांकृत्वा क्रमेणपायसकृसरच-
रूञ्छ्रपयित्वा दक्षिणजान्वाच्याज्याहु-
तिंजुहोति । अग्नेरुत्तरभागे ॐ प्रजाप-
तये स्वाहा इदंप्रजापतये न मम । अग्ने
र्दक्षिणभागे ॐ इंद्राय०इमिंद्राय० ।
इत्याघारौ । मध्येसमिद्धतमे आज्य-

भागौ । ॐ अग्नये॰ इदं॰ । ॐ सोमाय॰ इदं॰ । ततो यजमानेनद्रव्यत्यागः कार्यः । तत ऋत्विक्सहित आचार्यो जुहुयात् । तद्यथा–आदित्यादिनवग्रहान्क्रमेणार्कादिसमिच्चरुतिलाज्य द्रव्यैरष्टाष्टसंख्यया हुत्वा पूर्वोक्तग्रहहोमद्रव्येण अधिप्रत्यधिदेवताश्चतुःसंख्यया हुत्वा विनायकादिदिक्पालांतं क्रतुसंरक्षकदेवताः पलाशोदुंबरान्यतमसमिच्चरुतिलाज्यद्रव्येण द्विद्विसंख्ययाजुहोति । एवं ग्रहहोमंकृत्वा प्रधानदेवनिर्ऋतये॰ इन्द्रायअग्नयश्चतत्तन्मंत्रेणसमिधाज्यतिलपायसकृसरद्रव्येण प्रत्येकमष्टोत्तरशतमष्टाविंशतिसंख्या वा जुहुयात्।तत्र मंत्राः–ॐ

मोषुणःपरांपरानिर्ऋतिर्दुर्हणावधीत् । प
दीष्टतृष्णयासुस्वाहा इदं निर्ऋतयेनमः।
१०८।२८। ॐ इंद्रंवोविश्वतस्परिहवाम-
हेजनेभ्यः । अस्माकमस्तुकेवलः स्वाहा
इदमिंद्राय० १०८ । २८ ॐ अप्सुमे
सोमोऽअब्रवीदन्तर्विश्वानि भेषजा ।अग्निं
चंविश्वशंभुवमापंश्च विश्वभेषजीः स्वाहा
इदमद्भ्यः०१०८।२८। ततो विश्वेदेवा-
द्याश्चतुर्विंशतिदेवता अष्टाष्टसंख्याभिः
पायसाहुतिभिर्जुहुयात् । विश्वेभ्यो देवे-
भ्यः स्वाहा इदं विश्वेभ्योदेवेभ्यो न मम
॥ ८ ॥ ॐ विष्णवेस्वाहा इदं० ८ ॐ

कारः सर्वत्र । वसुभ्यः स्वाहा इदं० ८
वरुणाय इदं०८अजैकपदे स्वाहा इदं० ८
अहिर्बुध्न्याय०इदं०८पूष्णे स्वाहाइदं०८
अश्विभ्यां० इदं ०८ यमाय० इदं० ८
अग्नये० इदं०८ प्रजापतये इदं०८सोमा-
य०इदं० ८ रुद्राय० इदं० ८ अदितये०
इदं० ८ बृहस्पतये इदं० ८ सर्वेभ्यः०
इदं० ८ पितृभ्यः० इदं० ८ भगाय०
इदं०८ अर्यम्णे०इदं० ८ सवित्रे० इदं०
८ त्वष्ट्रे० इदं० ८ वायवे इदं० ८ इंद्रा-
ग्निभ्यां० इदं० ८ मित्राय० इदं० ८ ॐ
इंद्राय० इदं० ८अग्नये० इदं० ८ यमाय
०इदं०८निर्ऋतये स्वाहा इदं०८ ॐ वरु:
णाय स्वाहा इदं वरुणाय०८ ॐ वायवे

स्वाहा इदं०८ॐ कुबेराय० इदं०८ॐ ईशा-
नाय० इदं०८ इति हुत्वा वक्ष्यमाणर्ग्भिः
प्रत्यृचमष्टसंख्ययाकृसराहुतिं जुहुयात् ।
कृणुष्वेतिपंचदशर्चस्य गौतमवामदेवो-
ऋषिःरक्षोहादेवता त्रिष्टुप्छंदःकृसरहो-
मेविनियोगः॥ ॐ कृणुष्व पाजः॑प्रसितिं॒-
नपृथ्वीं याहिराजेवामंवा॒ ँ इमेन ॥
तृष्वीमनु प्रसितिन्द्रूणानोस्तांसि विध्यं-
रक्षसस्तपिष्ठैः स्वाहा इदं रक्षोहणे० ॥१॥
ॐ तवं॑भ्रमासऽआशुयापतंत्यनुस्पृशधृ-
षताशोशुचानः ॥ तपू ᳪ ष्यंग्नेजुह्वा
पतङ्गानसन्दितोविसृंज विष्वंगुल्काः

स्वाहा इदं रक्षो० ॥ २ ॥ प्रतिस्पशोवि-
सृंजतूर्णितमो भवापायुर्विशोऽअस्याऽअ-
दब्धः ॥ योनो दूरेऽअघशंᳬसोयोऽअ-
न्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् स्वाहा
इदं० ॥ ३ ॥ उदग्नेतिष्ठप्रत्यातंनुष्वन्यं १
मित्राँऽओषतात्तिग्महेते ॥ योनो अरातिं
समिधानचक्रे नीचातं धंक्ष्यत सन्नशु-
ष्कंम् स्वाहा ॥ इदंरक्षो ॥४॥ ऊर्ध्वो भव-
प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्या-
न्यग्ने॥ अवस्थिरातंनुहियातुजूनां जामि-
मजामिं प्रमृणीहिशत्रून्स्वाहा ॥ ५ ॥
इदंरक्षोहणे० । सते जानातिसुमतिंयंवि-

छ्रयऽईवंते ब्रह्मणे गातुमैरंत्॥ विश्वांन्यस्मै
सुदिनांनिरायोद्युम्नान्यर्यो विदुरो अभि
द्यौत् स्वाहा ॥६॥ इदंरक्षोहणे०। सेदंग्ने
ऽअस्तुसुभगंः सुदानुर्यस्त्वानित्येंनहवि-
षायउक्थैः॥ पिप्रींषतिस्वऽआयुंषिदुरो-
णेविश्वेदंस्मै सुदिनासासंदिष्टिः स्वाहा
इदं र०॥७॥अर्चामितेसुमतिघोस्यर्वाक्स-
न्तेवावातांजरतामियंगीः। स्वश्वांस्त्वा-
सुरथांमर्जयेमास्मे क्षत्राणिधारये रनुद्यून्
स्वाहा र० ॥ ८ ॥ इहत्वाभूर्याचंरेदुपत्म-
न्दोषांवस्तरदीदिवांसमनुद्यून् ॥ क्रीलं-
न्तस्त्वासुमनंसः सपे माभिद्युम्नातंस्थि-

वासो जनानाम् स्वाहा ॥ ९ ॥ इदं० ॥
यस्त्वा स्वश्वः सुहिरण्योऽअग्नऽउप-
याति वसुमता रथेन ॥ तस्य त्राता
भवसि तस्य सखा यस्तऽआतिथ्यमानुष-
ग्जुजोषत् स्वाहा इदं० ॥ १० ॥ महो रु-
जामि बन्धुता वचोभिस्तन्मा पितुर्गोतमा-
दन्वियाय । त्वं नो अस्य वचसश्चिकि-
द्धि होतर्यविष्ठ सुक्रतो दमूनाः स्वाहा
इदं० ॥ ११ ॥ अस्वप्नयस्तरणयः सुशे-
वाऽअतन्द्रासोऽवृकाऽअश्रमिष्ठाः ॥ तेपा-
यवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर-
स्वाहा इदं० ॥ १२ ॥ ये पायवो मामते

यन्तेंऽअग्नेपश्यंन्तोऽअन्धंदुरितादरंक्षन्॥ ररक्षतान्त्सुकृतोंविश्ववेदादिप्संतऽ इंद्रिप-वोनांहदेमुः स्वाहा इदंरक्षो० ॥ १३ ॥ त्वयांवयंसंधन्य१स्त्वोतास्तव प्रणींत्य-श्यामवाजांन् ॥ उभाशंसांसूदय सत्य-ताते नुष्ठुयाकृंणुह्यह्रयाण स्वाहा इदं० ॥ १४ ॥ अयातेंऽअग्नेसमिधां विधेमप्र तिस्तोमं शस्यमांनंगृभांय ॥ दहाशसो-रक्षसंः पाह्य१स्मान्द्रुहोनिदोमित्रमहो-ऽअवद्यात् स्वाहा इदं रक्षोहणे० ॥१५॥ ततः गायत्र्या विश्वामित्र ऋषिर्गायत्री-छन्दः । ॐ तत्संवितुर्वरेण्यं० स्वाहा इदं

सवित्रे० ॥ ८ ॥ जातवेदसेइतिमन्त्रस्य कश्यपऋषिः दुर्गादेवतात्रिष्टुप्छन्दः कृसरहोमे विनियोगः ॐ जातवेदसे सुनवामसोमंमरातीयतो निदंहातिवेदः । सनं÷पर्षदति दुर्गाणि विश्वांनावेव सिन्धुं दुरितात्यग्निः स्वाहा इदं दुर्गायै॥८॥त्र्यंब कमिति मंत्रस्य वसिष्ठऋषिः रुद्रोदेवता अनुष्टुप्छन्दः कृसरहोमेविनियोगः। ॐ त्र्यंम्बकंयजामहेसुगंधिम्पुष्टिवर्द्धनम्॥ उ र्वारुकमिवबंधनान्मृत्योर्मुक्षीय मामृतात स्वाहा इदं त्र्यम्बकाय॥८॥सीरायुंजन्ती तिमंत्रस्य बुधऋषिः ऋत्विक्स्तुतिर्देवता गायत्री छन्दः कृसरहोमे विनियोगः ।

ॐसीरांयुंजंतिकवयोंयुगावितंन्वतेपृथक्॥ धीरांदेवेषुंसुम्नयास्वाहा इदं ऋत्विक्स्तुतये ॥ ८ ॥ तामग्निवर्णामितिमंत्रस्य सौभरिः ऋषिर्दुर्गादेवता त्रिष्टुप्छंदःकृसरहोमे विनियोगः । ॐ तामग्निवंर्णां तपंसाज्वलंतीं वैरोचनींकर्मफलेषुजुंष्टाम् ॥ दुर्गां देवीं शरणं प्रपंद्यामहेऽसुरान्नाशमित्रेते स्वाहा इदं दुर्गायैनमः ॥८॥ वास्तोष्पते इतिमंत्रस्य वसिष्ठऋषिर्वास्तोष्पतिर्देवता त्रिष्टुप्छंदः कृसरहोमे विनियोगः । ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअंनमीवो भंवानः ॥ यत्वे-

मंहे प्रतितन्नो जुषस्वशन्नो भव द्विपदेशं चतुष्पदे स्वाहा इदं वास्तोष्पतये०॥८॥ अग्नेनय इति मंत्रस्यागस्त्यऋषिरग्निर्दे-वता त्रिष्टुप्छंदः कृसरहोमे विनियोगः। ॐ अग्नेनयंसुपथाराये ऽअस्मान्विश्वानि देववयुनानिविद्वान् ॥ युयोध्य १स्मज्जु-हुराणमेनो भूयिष्ठांतेनमऽउक्तिंविधेम स्वाहा । इदमग्नये० ॥ ८ ॥ क्षेत्रस्येति मंत्रस्यवामदेवऋषिः क्षेत्रपालोदेवताऽनु-ष्टुप्छंदः कृसरहोमेविनियोगः।ॐ क्षेत्र-स्यपतिनावयंहितेनेवजयामसि ॥ गाम-श्वंपोषयित्वासनोमृलातीदृशेस्वाहा इदं क्षेत्रस्यपतये०॥८॥गृणानाजमदग्निना इ-

तिमंत्रस्य जमदग्निर्ऋषिर्मित्रावरुणौदेवते गायत्रीछंदःकुसरहोमेविनियोगः।ॐगृणा नाजमदग्निनायोनावृतस्यसीदतम् ॥ पातं सोमंमृतावृधास्वाहा इदं मित्रावरुणाभ्यां० ॥ ८ ॥ अग्निदूतमिति मंत्रस्यकाण्वो मेधातिथिर्ऋषिरग्निर्देवता गायत्रीछंदः कुसरहोमेविनियोगः। ॐ अग्निंदूतम्पुरोदधे हव्यवाहमुपब्रुवे देवाँ आसादयादिहस्वाहाइदमग्नये० ॥ ८ ॥

ततः समिदाज्यचरुहोमः। हिरण्यवर्णामितिपंचदशर्चस्यकर्द्दमानंद चिक्लितेन्दिरासुताऋषयः श्रीर्देवता आद्यास्तिस्रोऽनुष्टुभः।तुर्याप्रस्तारपंक्तिः। पंचमीषष्ठ्यौ

त्रिष्टुभौ । ततोष्टावनुष्टुभावंत्याप्रस्तार-
पंक्तिः प्रत्यृचं समिदाज्यचरुहोमे विनि-
योगः । हिरण्यवर्णां हरिणीमित्यादिपं-
चदशर्ग्भिः प्रतिमंत्रमष्टसंख्याभिःसमि-
दाज्यचर्वाहुतयः । सर्वत्र इदं लक्ष्म्यै
नमम इतित्यागः। ॐ हिरंण्यवर्णांहरिंणीं
सुवर्णरजतस्रंजाम् ॥ चंद्रांहिरण्यमंयींल-
क्ष्मींजातवेदोम आवंहस्वाहा इदंलक्ष्म्यै
॥ १ ॥ तांमआवंहजातवेदो लक्ष्मीमंन
पगामिनीम् ॥ यस्यांहिरंण्यंविन्देयंगा-
मश्वं पुरुंषानहम् ॥ २ ॥ अश्वपूर्वांरंथ-
मध्यां हस्तिनांदप्रबोधिनीम् ॥ श्रियंदे-

वीमुपंह्वयेश्रीर्मा देवीर्जुषताम्॥३॥कांसो-
स्मितां हिरंण्यप्राकारांमार्द्रांज्वलंन्तीं तृ-
प्तांतर्पयन्तीं ॥ पद्मेस्थितांपद्मवंर्णां तामि-
होपंह्वयेश्रियम् ॥४॥ चन्द्रांप्रंभासांयश-
साज्वलंन्तींश्रियं लोके देवजुंष्टामुदारां॥
तांपद्मनेमीं शरणं प्रपंद्येअलक्ष्मीर्मेनश्य-
तां त्वां वृणे ॥ १ ॥ ५ आदित्य
वंर्णे तपसोधिंजातोवनस्पतिस्तवंवृक्षोथ
बिल्वः॥ तस्यफलांनितपसानुंदन्तुमाया-
न्तंरायाश्चंबाह्याअंलक्ष्मीः ॥ ६ ॥ उपैं-
तुमां देवसखः कीर्तिश्चमणिनासह ॥
प्रादुर्भूतो सुराष्ट्रेऽस्मिन्कीर्तिमृद्धिंददा-

तुमे० ॥७॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मी
र्नाशयाम्यहम् ॥ अभूतिमसमृद्धिंच
सर्वांनिर्णुदमेगृहात्० ॥ ८ ॥ गन्धं-
द्वारांदुराधर्षां नित्यपुष्टांकरीषिणीम् ॥ ईश्व
रींसर्वभूतानांतामिहोपह्वये श्रियम् ॥९॥
मनसःकाममाकूतिंवाचःसत्यमशीमहि।
पशूनां रूपमन्नस्यमयिश्रीःश्रयतांयशः
॥ २ ॥ १० ॥ कर्दमेनप्रजाभूतामयिसं-
भवकर्दम ॥ श्रियंवासयमेकुलेमातरंप-
द्ममालिनीम् ॥ ११ ॥ आपःस्रजन्तुस्नि-
ग्धानिचिक्लीतवसमेगृहे ॥ निचदेवींमा-
तरं श्रियंवासयमेकुले० ॥ १२ ॥ आर्द्रां-

पुष्करिणींपुष्टिंपिंगलांपद्ममालिनीम् ॥
चंद्रांहिरण्मयींलक्ष्मीं जातवेदोमआवह
॥ १२ ॥ आर्द्रां यः करिणीं यष्टिं सुव-
र्णांहेममालिनीम् ॥ सूर्यांहिरण्मयींल-
क्ष्मींजातवेदोम आवह० ॥ १४ ॥ तांम-
ऽआवहजातवेदोलक्ष्मीमनपगामिनीं ॥
यस्यांहिरण्यं प्रभूतिंगावोदास्योऽश्वान्वि-
न्देयंपुरुषानहं ॥ ३ ॥ १५ ॥ यः शुचिः
प्रयतोभूत्वाजुहुयादाज्यमन्वहम् ॥ सूक्तं
पंचदशर्चंच श्रीकामः सततंजपेत्स्वाहा
इदंलक्ष्म्यै ॥ १७ ॥ ततः पायसहोमः ॥
त्वन्नःसामेतिप्रगाथऋषिःसोमोदेवतात्रि-
ष्टुप्छन्दःपायसहोमे विनियोगः।ॐत्वंनः

सोमविश्वतो गोपाऽअदाभ्योमवसे धं-
राजन्नपस्निधोविश्वोमदे मानोदुःशंसऽइशा-
ता विवक्षसेस्वाहा इदंसोमाय० ॥१३॥
ॐ त्वंनः सोमसुक्रतुर्वयोधेयायजागृहि॥
क्षेत्रवित्तरोमनुषोविश्वोमदेंद्रुहोनः पाह्यं-
हसोविवक्षसे स्वाहा इदं सोमाय० इति
वा ॥ १३ ॥ ततश्चतुर्गृहीताज्यं जुहु-
यात् । यारुद्रेतिकश्यप ऋषिः रुद्रः
स्वराड्देवता अनुष्टुप् छन्दश्चतुर्गृहीता-
ज्यहोमेविनियोगः ॥ ॐ याते रुद्र शि-
वातनूरघोरापापकाशिनी ॥ तयां नस्त-
न्वाशन्तं मयागिरिशन्ताभिचाकशीहि

स्वाहा इदं रुद्राय० ॥ ३२ ॥ ततः स्रुवे-
णाज्याहुतिः । सप्तमहाव्याहृतीनां वि-
श्वामित्रादयोऋषयोऽग्न्यादयो देवताः
गायत्र्यादीनि छन्दांसि आज्यहोमेवि-
नियोगः । ॐ भूः स्वाहा इदमग्नये ॥१॥
ॐ भुवः स्वाहा इदंवायवे० ॥२॥ ॐ स्वः
स्वाहा इदंसूर्याय० ॥ ३ ॥ ॐ भूर्भुवः स्वः
स्वाहा इदंप्रजापतये० ॥ ४ ॥ इति व्य-
स्तसमस्तव्याहृतिभिराज्यं हुत्वा स्विष्ट-
कृदादिप्रायश्चित्तहोमांतं कुर्यात् । ततो
दिक्पालेभ्योनवग्रहेभ्यो विनायकादि-
भ्यो निर्ऋतये इंद्राय अग्नये रुद्राय
क्षेत्रपालायसदीपमाषभक्तबलीन् दद्यात्।
ततश्चाचार्योयजमानो वा समुद्राद्दूर्मिरि-

त्यादि पूर्वोक्तपूर्णाहुतिं जुहुयात्। ततः प्रणीतानिनयनादि कर्मशेषं समाप्य रुद्रकुंभं दक्षिणतः स्पृष्ट्वा त्र्यम्बक-मितिशतवारंजपेत्। रुद्राध्यायंचमका-ध्यायं च पठेत्। ततो रुद्रंनिर्ऋतिंच पंचोपचारैः संपूज्य। ॐ त्र्यंबकंय-जामहे० ॐ त्र्यबंकायनमः। ॐ मोषुणः परो परानिर्ऋतिर्दुर्हिणांवधीत्॥ पदिष्टतृष्णंयासह ॐ निर्ऋतये नमः। इत्युपस्थायसर्वकलशोदकं पात्रांतरेगृही-त्वा सर्त्विगाचार्योयजमानं सर्वौषधीभि-रनुलिप्तांगं धृतनववस्त्रं सपुत्रं तत्पत्नीमु-पवेश्य वक्ष्यमाणमंत्रैरभिषिंचेत्। ते च-

अक्षीभ्यामितिषण्णां मंत्राणां कश्यपो
ऋषिर्विवृहायक्ष्मनाशनोदेवता अनुष्टुप्-
छंदः अभिषेकेविनियोगः । ॐ अक्षी
भ्यांतेनासिकाभ्यां कर्णाभ्यांछुबुकादधिं
॥ यक्ष्मंशीर्षण्यंमस्तिष्कांजिह्वायाविवृ-
हामिते ॥ १ ॥ ग्रीवाभ्यंस्तउष्णिहाभ्यः
कीकंसाभ्योऽअनूक्यात् ॥ यक्ष्मंदोष-
ण्य१मंसाभ्यां बाहुभ्यांविवृहामिते ॥२॥
आंत्रेभ्यं स्तेगुदांभ्यो वनिष्ठोर्हृदंयादधिं
॥ यक्ष्मंमतंस्नाभ्यां यक्नः प्लाशिभ्यो-
दिवृहामिते ॥३॥ ऊरुभ्यांतेऽअष्ठिवद्भ्यां
पार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंश्रोणिभ्यां

भासंदान्दंसंसो विवृंहामिते ॥ ४ ॥ मेहं-
नाहनं करणाल्लोमंभ्यस्तेनखेभ्यः ॥
यक्ष्मंसर्वस्मादात्मनः स्तमिदंविवृंहा-
मिते ॥ ५ ॥ अंगादंगाल्लोम्नोलोम्नो
जातं पर्वणि पर्वणि ॥ यक्ष्मं सर्वस्मादा-
त्मनस्तमिदंविवृंहामिते ॥६॥ त्रिभिष्ट्वंदे-
वेति सप्तानां मंत्राणां वसिष्ठऋषिःआद्या-
नांत्रयाणामग्निर्देवतातत्श्चतुर्णांविश्वेदे-
वादेवता आद्यागायत्री द्वितीयानुष्टुप्-
छंदांसि ततस्तिस्रो गायत्र्योऽन्त्येद्वेअनु-
ष्टुभौ अभिषेकविनियोगः॥७॥२॥१८॥ॐ
त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैः सोमधामभिः ॥

अग्नेदक्षैः पुनीहिनः ॥ १ ॥ पुनंतुमांदेव-
जनाः पुनन्तुवसंवोधिया । विश्वेदेवाःपु-
नीतमा जातवेदः पुनीहिमां ॥२॥ प्रप्यां-
यस्वप्रस्यंन्दस्वसोमविश्वेभिरंशुभिः ।
देवेभ्यंऽउत्तमंहविः ॥ ३ ॥ उपप्रियंनि
मतं युवानमाहुतीवृधंम् ॥ अगंन्मबिभ्र-
तोनमः ॥४॥ अलां यस्यपरशुर्ननाशुत
मापवस्वदेवसोम । आखुंचिदेव देवसोम
॥ ५ ॥ यःपावमानीरध्येत्यृषिभिः संभृं-
तꣳरसम् ॥ सर्वंसपूतमश्नातिस्वदितंमा
तरिश्वना ॥ ६ ॥ पावमानीर्यो अध्ये-
त्यृषिभि संभृंतꣳरसम् ॥ तस्मैसरस्व-

तीदुहेक्षीरंसर्पिर्मधूदकम् ॥७॥ आपोहि-
ष्ठेतिनवर्चस्यांबरीषः सिंधुद्वीप आपोगा-
यत्री अंत्येद्वे अनुष्टुभौ पंचमीवर्द्धमाना
सप्तमीप्रतिष्ठा अभिषेके विनियोगः ॥७
।६।५। ॐ आपोहिष्ठामयोभुवस्तानंऊर्जे
दधातन। महेरणायचक्षसे ॥ १ ॥ योवः
शिवतमोरसस्तस्यभाजयतेहनः।उशती-
रिवमातरः ॥ ५ ॥ तस्माऽअरंङ्गमामवो
यस्यक्षयायजिन्वथ॥ आपोजनयथाचनः
॥ ३ ॥ शंनोदेवीरभिष्टयऽआपोभवन्तु
पीतये। शंयोरभिस्रवंतुनः ॥ ४ ॥ ईशा-
नावार्याणांक्षयन्तीश्चर्षणीनाम् । अपो

यांचामिभेषजम् ॥ ५ ॥ अप्सुमेसोमोऽ-
अब्रवीदुन्तर्विश्वांनिभेषजा ॥ अग्निंचंवि-
श्वशंम्भुवम् ॥ ६ ॥ आपंःपृणीत भेष-
जंवरूथंतन्वे ३ ममं । ज्योक्चसूर्यंदृ-
शे ॥ ७ ॥ इदमांपः प्रवंहतयत्किं-
चंदुरितं मयिं ॥ यद्वाहमंभिदुद्रोह-
यद्वांशेपऽउतानृतम् ॥ ८ ॥ आपो-
ऽअद्यान्वंचारिषंरसेनसमंगस्महि ॥ पय-
स्वानग्नऽआगंहि तंमासंसृजवर्चसा ॥९॥
आप इद्वा इति मंत्रद्वयस्यसप्तर्षयोऋषयः
विश्वेदेवादेवता अनुष्टुपछन्दः अभिषेके
विनियोगः ॥ ८ ॥ ७ ॥ २५ ॥ ॐ आप-

इद्वाउभेषजीरापोंअमीवचातनीः॥ आपः सर्वस्यभेषजीतास्त कृण्वंतु भेषजम् ॥१॥ हस्ताभ्यां दशशाखाभ्यांजिह्वावाचः पुरोगवी । अनामयित्नुभ्यां त्वाताभ्यां त्वोपंस्पृशामसि ॥ २ ॥ सहस्राक्षेणेति मंत्रस्य प्राजापत्यऋषिर्यक्ष्मनाशनोयक्ष्महादेवता त्रिष्टुप्छन्दःअभिषेके विनियोगः । ८ । ८ । १९ । ॐसहस्राक्षेणंशतशारदेनशतायुषाहविषाहार्षमेनम्॥शतं यथेमंशरदोनयातीन्द्रो विश्वस्यदुरितस्यपारम् । शतंजीवशरदोवर्धमानः शतंहेमंताञ्छतमुवसंतान् । शतमिन्द्रा-

ग्नीसंवितावृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥ २ ॥ आहार्षत्वाविदंत्वा पुनरागाः पुनर्भव । सर्वाङ्गसर्वंतेचक्षुः सर्वमायुश्चतेविदम्॥३॥ ॐ देवस्यंत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णो हस्ताभ्याम् । सरस्वत्यैवाचोयन्तुर्यंत्रियेदधामि बृहस्पतेष्वासाम्राज्येनाभिषिंचाम्यसौ ॥ ।१। देवस्यत्वा० सरस्वत्यै० वाचोयन्तुर्यंत्रेणाग्नेःसाम्राज्येनाभिषिंञ्चामि ॥२॥ देवस्यंत्वा० अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंञ्चामि । सरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंञ्चामीन्द्रस्येन्द्रियेण

बलाय श्रियै यशंसेऽभिषिञ्चामि ॥ ३ ॥

यज्जाग्रतेतिषण्णां शिवसंकल्पमंत्राणां प्रजापतिर्मनस्त्रिष्टुपूछंदः अभिषेके विनियोगः । ॐ यज्जाग्रंतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवेति ॥ दूरङ्गमञ्ज्योतिषांज्योतिरेकंतन्मेमनः शिवसङ्कल्पमस्तु १ येन कर्माण्यपसोमनीपिणो यज्ञे कृण्वन्ति विदथेषुधीराः ॥ यदपूर्वंयक्षमंतःप्रजानां तन्मेमनःशिवसंकल्पमस्तु ॥ २ ॥ यत्प्रज्ञानमुतचेतोधृतिश्च यज्जोतिरमृतंप्रजासु । यस्मान्नऋतेकिंचनकर्मक्रियते तन्मेमनः शिवसंकल्पमस्तु ॥ ३ ॥

येनेदंभूतंभुवंनंभविष्यत्परिगृहीतममृतेंन
सर्वंम् ॥ येनंयज्ञस्त्रायतेंसप्तहोंतातन्मे-
मनंःशिवसंकल्पमस्तु ॥ ४ ॥ यस्मिन्नृ-
चःसामयजूᳬषियस्मिन्प्रतिष्ठिता रथ-
नाभाविवाराः ॥ यस्मिंश्चित्तᳬसर्वमोतं
प्रजानांतन्मेमनंःशिवसंकल्पमस्तु ॥५॥
सुषारथिरश्वांनिवयन्मंनुष्यान्नेनीयतेऽ-
भीषुंभिर्वाजिनंइव ॥ हृत्प्रतिष्ठंयदजिरं-
यविष्ठं तन्मे मनंःशिवसंकल्पमस्तु ॥६॥
ॐयोऽसौ वज्रधरो देवोमहेन्द्रोगजवा-
हनः ॥ मूलजातशिशोर्दोषं मातापित्रो-
र्व्यपोहतु ॥ १ ॥ योऽसौ शक्तिधरोदे-

वोहुतभुङ्मेषवाहनः सप्तजिह्वश्च देवो-
ऽग्निर्मूलदोषंव्यपोहतु ॥२॥ योऽसौ दंड-
धरोदेवोधर्मोमहिषवाहनः ॥मूलजातशि
शोर्दोषंमातापित्रोर्व्यपोहतु ॥ ३ ॥ योऽ
सौखड्गधरोदेवोनिर्ऋती राक्षसाधिपः ॥
प्रशामयतुमूलोत्थंदोषंगंडांतसंभवम् ४॥
योऽसौ पाशधरो देवो वरुणश्चजलेश्वरः॥
नक्रवाहः प्रचेताख्योमूलोत्थाघंव्यपोहतु
॥ ५ ॥ योऽसौ देवो जगत्प्राणो मारुतो
मृगवाहनः ॥ प्रशामयतु मूलोत्थं दोषं
बालस्य शान्तिदः ॥ ६ ॥ योऽसौनिधि-
पतिर्देवः खड्गभृद्वाजिवाहनः ॥ माता-
पित्रोः शिशोश्चैव मूलदोषं व्यपोहतु
॥ ७ ॥ योऽसौ पशुपतिर्देवः पिनाकी

वृषवाहनः ॥ आश्लेषामूलगंडांतं दोष-
माशु व्यपोहतु ॥ ८ ॥ विघ्नेशः क्षेत्रपो
दुर्गालोकपाला नवग्रहाः ॥ सर्वदोष-
प्रशमनं सर्वे कुर्वंतु शांतिदाः ॥ ९ ॥
सुरास्त्वामभिषिंचंत्वित्यादिभिः पूर्वो-
क्तैश्चाभिषिच्य वस्त्रांतरितनिर्ऋतिरुद्रकुं-
भोदकेनान्येन च शतछिद्रमंतर्धाय
स्नापितो यजमानो धौते वाससी धृत्वा
तिलकं कृत्वा सापत्यकलत्रः कांस्यपा-
त्रस्थाज्यं ॐ रूपंरूपम्प्रतिरूपोबभूवत-
दस्यरूपम्प्रतिचक्षणाय । इन्द्रोमायाभिः
पुरुरूपईयते एते युक्ताह्यस्यहरयः शता-
दशेत्ययं वैहरयोयंवैदशसहस्राणिब-

हूनि चानन्तातदेतद्ब्रह्म पूर्वमनुभवाह्य-
जमनुः सर्वानुशासनम् ॥ १ ॥ इतिमंत्रे-
णावेक्ष्य विप्राय दत्त्वा आचार्यादीन्सं-
पूज्य आचार्याय सवत्सां धेनुं ब्रह्मणेवृषभं
रुद्रजापिने कृष्णमनड्वाहं धेन्वाद्यलाभे
तत्तन्मूल्यं वा दत्वा स्वशक्त्या ऋत्वि-
ग्भ्यो यथाशक्ति दक्षिणां भूयसीं च
दत्त्वा निर्ऋत्यादीनामुत्तरपूजांविधाय
उत्तिष्ठ० यांतुदेव० इतिविसृज्य आचा-
र्याय निर्ऋतिप्रतिमाकुंभादि रुद्रजापिने
रुद्रप्रतिमां कुंभादि संकल्पपूर्वकं
प्रतिपाद्य अग्निं संपूज्य गच्छग-
च्छेतिविसृज्य शतं तदर्द्धं दश वा ब्राह्म-

णान्नभोजयित्वा शांतिसूक्तजपंकारयित्वायस्यस्मृत्येति कर्मपूर्णतां वाचयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत ॥
एवं यः कुरुते शांति शौनकोक्तप्रमाणतः।
तदनिष्टं तुसकलं सद्य एव विनश्यति॥१॥

इति श्रीगौडवंशावतंसपण्डितवैद्यश्रीचतुर्थीलाल-(चौथमल) विरचिते शान्तिप्रकाशे शौनकोक्त-मूलशांतिप्रयोगः समाप्तः

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८

KHEMRAJ SHRIKRISHNADASS